केवल अभ्यास हेतु नमूना प्रश्न पत्र

**Sample Question Paper for Practice only**

हायर सेकेण्ड्री स्कूल परीक्षा – 2025

**Higher Secondary Examination – 2025**

विषय – संस्कृत

**Subject - Sanskrit**

| Total Question | Total Printed Pages | Time | Maximum Marks |
|---|---|---|---|
| 23 | 06 | 3:00 Hours | 80 |

**निर्देशा** :– (i) सर्वे प्रश्नाः निर्देशानुसारेण अनिवार्याः सन्ति।
(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

01. उचितं विकल्पं चित्वा लिखत। **(1 X 6 = 6)**

(क) नमस्ते इत्यस्य पदे सन्धिः अस्ति –
(i) गुणस्वरसन्धिः (ii) यण्स्वर सन्धिः
(iii) विसर्ग सन्धिः (iv) व्यञ्जन सन्धिः

(ख) शान्तोभवः' पदस्य सन्धिविच्छेदः अस्ति –
(i) शान्तः + भवः (ii) शान्त् + भवः
(iii) शान्त् + अभवः (iv) शान्त् + भव

(ग) 'गुणेनात्र' इत्यस्य पदे सन्धिः अस्ति –
(i) गुणस्वर सन्धिः (ii) वृद्धिस्वरसन्धिः
(iii) यणस्वरसन्धिः (iv) दीर्घस्वरसन्धिः

(घ) 'दीपप्रकाशे' पदस्य समासविग्रहः अस्ति –
(i) दीपं प्रकाशे (ii) दीपस्य प्रकाशे
(iii) दीपात्प्रकाशे (iv) दीपे प्रकाशे

(ङ) 'गम्भीरस्वरेण' पदे समासः अस्ति ।
(i) द्विगु समासः (ii) तत्पुरुष समासः
(iii) कर्मधारय समासः (iv) अव्ययीभाव समासः

(च) 'त्रिविधम्' पदे समासः अस्ति –
(i) तत्पुरुष समासः (ii) द्विगु समासः
(iii) द्वन्द्व समासः (iv) बहुब्रीहि समासः

02. प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरूत– **(1 X 7 = 7)**

(क) 'यास्यति' पदे ................................... धातुः अस्ति। (या/यास्)
(ख) 'असि' पदे ......................... लकारः अस्ति। (लृट्/लट्)
(ग) 'कथयन्ति' पदे ........................... अस्ति। (एकवचनम्/बहुवचनम्)
(घ) 'उपास्यम्' इत्यस्मिन् पदे ........................... उपसर्गः अस्ति। (उप/अप)
(ङ) 'भवति' पदे ...................... पुरूषः अस्ति। (प्रथमः/मध्यमः)
(च) 'निशम्य' पदे ............................ उपसर्गः अस्ति। (निस्/नि)
(छ) 'प्र' उपसर्गयुक्तः पदः ............................ अस्ति। (प्रणम्य/प्रायः)

03. उचितं मेलनं कुरूत– **(1 X 6 = 6)**

| | (अ) | | (ब) |
|---|---|---|---|
| (क) | ज्ञात्वा | (i) | अव्ययः |
| (ख) | ल्यप् | (ii) | क्त्वा |
| (ग) | खलु | (iii) | विधाय |
| (घ) | परित्रातव्यः | (iv) | तत्र |
| (ङ) | यथा राजा | (v) | तव्यत् |
| (च) | अत्र | (vi) | तथा प्रजा |

04. एकपदेन/वाक्येन उत्तरं लिखत– **(1 X 7 = 7)**

(क) 'पौरूषेयम्' पदस्य विलोमं पदं लिखत ?
(ख) कामभोगेषु प्रसक्ताः कुत्र पतन्ति ?
(ग) आर्यभुवि शाटीतः का विराजते ?
(घ) 'निशीथे' पदस्य पर्यायपदं लिखत ?
(ङ) 'खलानाम्' पदस्य विलोमपदं किमस्ति ?
(च) 'शर्वरी' पदस्य पर्यायपदं किमस्ति ?
(छ) दौवारिकस्य निष्ठा केन परीक्षिता ?

05. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत– **(1 X 6 = 6)**

(क) 'कपटी सन्यासिन्' इत्यत्र कपटी विशेषणपदम् अस्ति।
(ख) 'राजेन्दुः दिलीपः' इत्यत्र दिलीपः विशेषणपदम् अस्ति।
(ग) 'नमः' योगे चतुर्थी विभक्तिः भवति।
(घ) 'कुशल' पदस्य योगे सप्तमी विभक्तिः भवति।
(ङ) 'अमला खद्योतपंक्तिः' इत्यत्र 'अमला' विशेष्यपदम् अस्ति।
(च) 'महाबलम् मुञ्जम्' इत्यत्र मुञ्जम् विशेष्यपदम् अस्ति।

06. शिष्यः किं कृत्वा प्रजातन्तुं न व्यवच्छेत्सी ? (2)

**अथवा**

जगतः क्षयाय के प्रभवन्ति ?

07. वेदाः कति सन्ति ? तेषां नामानि लिखत ? (2)

**अथवा**

लक्ष्मणेन किं कर्तुं निश्चयः कृतः ?

08. दिलीपस्य कार्याणाम् आरम्भः कीदृशः आसीत् ? (2)

**अथवा**

ऋतध्वजः स्वपरिचयं कथं ददाति ?

09. मूर्तिमती हल्दीघाटी कथम् आटीकते ? (2)

**अथवा**

दौवारिकः संन्यासिन कम् अमन्यत् ?

10. केषां समाजे अपण्डितानां मौनं विभूषणम् ? (2)

**अथवा**

कः भोजस्य जन्मपत्रिकां निर्मितवान् ?

11. अधोलिखितेषु वाक्येषु द्वयोः वाक्ययोः कः कं प्रति कथयति इति लिखत– (2)

| | कः | कं प्रति |
|---|---|---|
| (क) एक शरीर संक्षिप्ता पृथिवी रक्षितव्या । | .................. | .................... |
| (ख) यत्कृते महति क्लेशे राज्ये मे न मनोरथः। | .................. | .................... |
| (ग) नारी जीवनयात्रायां कमपि सहचरमपेक्षते। | .................. | .................... |

12. अधोलिखितेषु द्वयोः वाक्ययोः रेखाङ्कित पदान्याधृत्य प्रश्ननिर्माणं कुरूत– (2)

(क) या उषसि शोभां दधाति।
(ख) आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः।
(ग) शब्दानाम अन्वाख्यानं व्याकरणम्।

13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषितंश्लोकं लिखत । (2)

14. 'प्रतिमानाटकम्' नाटकस्य रचनाकारः कः अस्ति? अस्मिन् कति अङ्काः सन्ति ? (2)

**अथवा**

'मदालसाचम्पू' कस्य रचना अस्ति ? अस्य काव्यस्य नायिका का अस्ति ?

15. 'किरातार्जुनीयम्' महाकाव्यस्य रचनाकारः कः अस्ति? अस्मिन् महाकाव्ये कति सर्गाः सन्ति? (2)

**अथवा**

'कादम्बरी' ग्रन्थस्य लेखकः कः अस्ति ? अस्य ग्रन्थस्य नायकः कः अस्ति ?

16. रिक्तस्थानपूर्तिं कुरूत (कोऽपि त्रयः) (3)

(क) .................................. शूरं प्राप्नोति ।
(ख) सत्यं .................................. धर्मं चर ।
(ग) .................................. अरिः प्रहरति ।
(घ) ........................ तुरीयाश्रमसेवी इति प्रणम्यते ।
(ङ) त्रिविधं .............................. द्वारम्।

17. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।

(क) अस्माकं कानि उपास्यानि ?
(ख) कीदृशानि कर्माणि सेवितव्यानि ?
(ग) काभ्यां न प्रमदितव्यम् ?

**अथवा**

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह–त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्।

(क) कस्य वचनम् आकर्ण्य राजा कुपिता भवति ?
(ख) कं ज्ञात्वा भोजः किमपि वत्सराजं कथितवान् ?
(ग) वत्सराजः भोजं रथे निवेश्य कुत्र नीतवान् ?

18. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्त्रगुणमुत्स्त्रष्टुमादत्ते हि रसं रविः।।

(क) केषां भूत्यर्थं सः बलिम् अग्रहीत् ?
(ख) सः ताभ्यो (प्रजाभ्यः) कम् अग्रहीत् ?
(ग) रविः रसं किमर्थम् आदत्ते ?

**अथवा**

नीलेन पक्ष निवहेन खमहासन्तः
चञ्चवा फलानि विमलानि समञ्चयन्तः।
'श्रीराम' नाम मधुरं मधुरं क्वणन्तः
अद्यापि यत्र सुशुका विलसन्ति सन्तः।।

(क) यत्र के विलसन्ति ?
(ख) सुशुकाः केन खम् आहसन्ति ?
(ग) सुशुकाः किं नाम मधुरं क्वणन्ति ?

**19.** अधोलिखितंनाट्याशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

काञ्चुकीयः – अथ .........................

रामः – अतः परं न मातुः परिवादं श्रोतुमिच्छामि ।
महाराजस्य वृत्तान्तस्तावदभिधीयताम्।

काञ्चुकीयः– ततस्तदानीम्,
शोकाद् वचना द् राज्ञा हस्ते नैव विसर्जितः।
किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः।।

(क) रामः कस्याः परिवादं श्रोतुमिच्छति ?
(ख) कस्य वृत्तान्तः तावद् अभिधीयताम् ?
(ग) कस्मात् वचनात् राज्ञा हस्तेन एव विंसर्जित ?

**अथवा**

ऋतध्वजः – लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः।

मदालसा – कुण्डले ! लक्ष्मीपूजायां न मे प्रवृत्तिः। यदि
लक्ष्मीः पूज्या प्रिया च अतिथिवर्यस्य, तदा
इदानीमेव मे नमस्कारः।

ऋतध्वजः – स्वाभिमानिनि प्रिये! समक्षं ते कथं कापि सपत्नी स्थातुं शक्नोति ?
लक्ष्मीस्तु तव दासी भविष्यति नैव सपत्नी ।
मद्गार्हस्थ्यं तु त्वदधीनं भविष्यति।
आत्मानं भाविसन्तति च ज्ञानविज्ञानानुसन्धात्रया हस्ते समर्पयितुमीहे।
आगम्यताम्, गुरुभ्यः पितृभ्यां च समाचारं श्रावयावः।

(क) कस्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः अस्ति?
(ख) कस्यां पूजायां न मे प्रवृत्तिः ?
(ग) काभ्यां समाचार श्रावयावः ?"

**20.** शुल्कमुक्त्यर्थम् एकं प्रार्थना पत्रं स्वस्य प्राचार्यस्य कृते संस्कृतभाषायां लिखत । (4)

**अथवा**

मातरं प्रति एकं पत्रं लिखत, यत सा भवतः पठन विषये चिन्ता मा कुर्यात् ।

**21.** अधोलिखितम् अपठितगद्यांशं पठित्वा चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (4)

महानगरेषु प्रदूषणस्य समस्यायाः एकमेव समाधानम् अस्ति यत् तेषां स्थानानां वासिभिः शुद्धः वायुः शुद्धं जलं शुद्धाश्च खाद्यपदार्थाः प्रोक्तव्याः। जनसम्मर्दयुक्त स्थानेभ्यः च कुत्रचिद् दूरं गत्वा प्रातः सायं भ्रमणस्य समय यापनीयः। एकस्तु अस्मिन् विज्ञापनयुगे ध्वनिविस्तारक यन्त्राणां बहुलः प्रयोगः महानगरेषु भवति, येन कारणेन ध्वनिप्रदूषणं वर्धते। अपरतः तेषां स्थानानां श्वासरोधवातावरणं विविधान् रोगान् जनयति। अतः तत्र वासिभ्योः जनेभ्यः उन्मुक्तवातावरणस्य अनिवार्यत्वं भजते। तैः स्वसमीपस्थलेषु प्रसून पात्रेषु केचित् लघवः पादपाः वपनीयाः यथासंभवं च गृहस्य अवस्कराः निश्चते स्थाने एवं क्षेपणीयाः न तु स्वसदन समीपे।

(क) केषु प्रदूषणस्य समस्या अस्ति?
(ख) केन कारणेन ध्वनिप्रदूषणं वर्धते ?
(ग) श्वास रोधवातावरणं कान् जनयति ?
(घ) केभ्यः उन्मुक्तवातावरणस्य अनिवार्यत्वं भजते?
(ङ) नागरिकैः प्रदूषणरक्षायाः कः उपायः करणीयः ?

**22.** प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरुत – **(4)**

(केवलं, वयं, महाराजस्यु, प्रवेशसमयो, रात्रौ, संन्यासिन्, विरम, दौवारिका)

सन्यासिन्! ................ बहूक्तम्, ............. न वयं ................. ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, ............ महाराजशिववीरस्याज्ञां ............... शिरसा ................। प्राह्णे ............... सन्ध्योपासनसमये भवादृशानां ........... भवति, न तु .................।

**अथवा**

(मन्त्राणां, युजर्विधा, व्याकरणम्, छन्दसां, ग्रहगणितं, मीमांसा, वर्णानां, शिक्षा)

तत्र ................ स्थान–करण–प्रयत्नादिभिः निष्पत्तिनिर्णयिनी ................।
नानाशाखाधीतानां .......................... विनियोजकं सूत्रं कल्पः।
सा च ...................। शब्दानामन्याख्यानं .................। निर्वचनं निरुक्तम्।
...................... प्रतिपादयित्ती छन्दोविचितिः। ........................ ज्योतिषम्।
पौरुषेयं तु पुराणम्, आन्वीक्षिकी, ................ स्मृतिन्त्रम् अपि चत्वारि शास्त्राणि।

**23.** अधोलिखितेषु एकस्य कवेः परिचयं लिखत– **(4)**

(क) भासः (ख) अश्वघोषः

(ब) वेदव्यासः (घ) कालिदासः

——————————**XXX**——————————